# भवानी भुजङ्गं

षडाधार पङ्केरु हान्त र्विराजत्
सुषुम्नान्तराले ऽतितेजो ल्लसन्तीम् ।
सुधामण्डलं द्रावयन्तीं पिबन्तीं
सुधामूर्ति मीडे चिदानन्द रूपाम् ॥ १॥

ज्वलत्कोटि बालार्क भासारुणाङ्गीं
सुलावण्य शृङ्गार शोभाभिरामाम् ।
महापद्म किञ्जल्क मध्ये विराजत्
त्रिकोणे निषण्णां भजे श्रीभवानीम् ॥२॥

क्वणत्किङ्किणी नूपुरोद्भासि रत्न-
प्रभालीढ लाक्षार्द्र पादाब्ज युग्मम् ।
अजेशाच्युताद्यैः सुरैः सेव्यमानं
महादेवि मन्मूर्ध्नि ते भावयामि ॥ ३॥

सुषोणाम्बरा बद्ध नीवी विराजन्
महारत्न काञ्ची कलापं नितम्बम् ।
स्फुर द्दक्षिणावर्त नाभिं च तिस्रो
वली रम्यते रोमराजिं भजेऽहम् ॥ ४॥

लसद्वृत्त मुत्तुङ्ग माणिक्य कुम्भो-
पमश्री स्तन द्वन्द्व मम्बाम्बुजाक्षि ।

भजे दुग्ध पूर्णाभिरामं तवेदं
महाहार दीप्तं सदा प्रस्नुतास्यम् ॥ ५॥

शिरीष प्रसूनो ल्लसद्बाहु दण्डै-
र्ज्वलद्बाण कोदण्ड पाशाङ्कुशैश्च ।
चलत्कङ्कणोदार केयूर भूषो-
ज्ज्वलद्भि र्लसन्तीं भजे श्रीभवानीम् ॥ ६॥

शरत्पूर्ण चन्द्र प्रभापूर्ण बिम्बा-
धरस्मेरव वक्त्रारविन्दां सुशान्तम् ।
सुरत्नावली हार ताटङ्क शोभां
महासुप्रसन्नां भजे श्रीभवानीम् ॥ ७॥

सुनासापुटं पद्मपत्राय ताक्षं
यजन्तः श्रियं दानदक्षं कटाक्षम् ।
ललाटो ल्लसद्गन्ध कस्तूरि भूषो-
ज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥ ८॥

चलत्कुण्डलां ते भ्रमद्भृङ्ग वृन्दां
घन स्निग्ध धम्मिल्ल भूषोज्ज्वलन्तीम् ।
स्फुरन्मौलि माणिक्य मध्येन्दु रेखा-
विलासोल्लस द्दिव्य मूर्धान मीडे ॥ ९॥

इति श्रीभवानि स्वरूपं तदेवं
प्रपञ्चात्परं चातिसूक्ष्मं प्रसन्नम् ।

स्फुरत्वम्ब बिम्बस्य मे हृत्सरोजे
सदा वाङ्मयं सर्व तेजोमयं च ॥ १०॥

गणेशाणिमा द्याखिलैः शक्ति वृन्दैः
स्फुरच्छ्री महाचक्र राजोल्लसन्तीम् ।
परां राजराजेश्वरीं त्वा भवानीं
शिवाङ्कोपरि स्थां शिवां भावयेऽहम् ॥ ११॥

त्वमर्क स्त्वमग्नि स्त्वमिन्दु स्त्वमाप-
स्त्वमाकाश भू र्वायव स्त्वं चिदात्मा ।
त्वदन्यो न कश्चि त्प्रकाशो ऽस्ति सर्वं
सदानन्द संवि त्स्वरूपं तवेदम् ॥ १२॥

गुरुस्त्वं शिवस्त्वं च शक्तिस्त्वमेव
त्वमेवासि माता पिताऽसि त्वमेव ।
त्वमेवासि विद्या त्वमेवासि बुद्धि-
र्गतिर्मे मतिर्देवि सर्वं त्वमेव ॥ १३॥

श्रुतीना मगम्यं सुवेदाग माद्यैर्-
महिम्नो न जानाति पारं तवेदम् ।
स्तुतिं कर्तु मिच्छामि ते त्वं भवानि
क्षमस्वेद मम्ब प्रमुग्धः किलाहम् ॥ १४॥

शरण्ये वरेण्ये सुकारुण्य पूर्णे
हिरण्योद राद्यै रगम्ये ऽतिपुण्ये ।

भवारण्य भीतं च मां पाहि भद्रे
नमस्ते नमस्ते नमस्ते भवानि ॥ १५॥

इमा मन्वहं श्रीभवानी भुजङ्ग-
स्तुतिर्यः पठेच्छ्रोतु मिच्छेत तस्मै ।
स्वकीयं पदं शाश्वतं चैव सारं
श्रियं चाष्टसिद्धिं भवानी ददाति ॥ १६॥

भवानी भवानी भवानी त्रिवार-
मुदारम् मुदा सर्वदा ये जपन्ति ।
न शोकम् न मोहम् न पापं न भीतिः
कदाचि त्कथंचि त्कुतश्चि ज्जनानाम् ॥ १७॥

इति श्रीमच्छङ्कराचार्य विरचितं भवानी भुजङ्ग प्रयात स्तोत्रं सम्पूर्णम् ॥